

# व्यसने मित्रपरीक्षा ।

हितोपदेशात् स्वीकृता एषा कथा । हितोपदेशस्य कर्ता नारायणपण्डितः। हितोपदेशस्य चत्वारः विभागाः सन्ति । १) मित्रलाभः २) सुहृद्भेदः ३) विग्रहः ४) सन्धिः । ग्रन्थेऽस्मिन् पशुपक्षिणां कथामाध्यमेन नीतिवचनानि बोधितानि ।

- उत्तममित्रे के गुणाः भवेयुः ?
- सङ्कटसमये मित्रेण साहाय्यं कृतमिति कदाचिद् अनुभूतं वा ?





अस्ति एकं चम्पकं नाम अरण्यम् । अरण्ये चित्राङ्गो नाम मृगः एकाक्षो नाम काकश्च स्नेहेन निवसतः स्म। एकदा चित्राङ्गः वने भ्रमन् केनापि शृगालेन अवलोकितः । क्षुद्रबुद्धिः नाम सः शृगालः स्वार्थहेतुना मृगेण सह मित्रताम् ऐच्छत्। अस्तङ्गते सवितरि क्षुद्रबुद्धिः मृगेण सह मृगस्य निवासस्थानं गतः । मृगशृगालौ दृष्ट्वा काकोऽवदत्, ''सखे चित्राङ्ग! कोऽयं द्वितीयः ?'' मृगः **अब्रूत**, ''जम्बूकोऽयम् । अस्मत्सख्यम् इच्छति ।'' काकः उपादिशत्, ''अकस्मादागन्तुना सह मित्रता न युक्ता।'' तदाकर्ण्य जम्बूकः सकोपम् **आह**, ''मृगस्य प्रथमदर्शने भवानपि अपरिचितः एव आसीत्। यथायं मृगः मम बन्धुः तथा भवानपि।'' मृगः **अब्रवीत्**, ''अलं विवादेन । वयं सर्वे आनन्देन एकत्र निवसामः ।'' काकेनोक्तम्, ''एवमस्तु।''

किञ्चित्कालानन्तरं शृगालः मृगम् अवदत्, ‘वनेऽस्मिन् एकं सस्यपूर्णक्षेत्रमस्ति। दर्शयामि त्वाम्।’ तथा कृते मृगः प्रत्यहं तत्र गत्वा सस्यम् अखादत् । तद् दृष्ट्वा एकस्मिन् दिने क्षेत्रपतिना पाशः योजितः । तत्रागतः मृगः पाशैर्बद्धः । सः अचिन्तयत्, ‘‘इदानीं मित्राण्येव शरणं मम ।’’ दूरात् तत् पश्यन् जम्बूकः मनसि आनन्दितः। सोऽचिन्तयत्, ‘‘फलितः मे मनोरथः । इदानीं प्रभूतं भोजनं प्राप्स्यामि ।’’ मृगस्तं दृष्ट्वा **अब्रवीत्**, ‘‘मित्र, छिन्धि तावन्मम बन्धनम् । त्रायस्व माम् ।’’ जम्बूको दूरादेवावदत्, ‘‘मित्र, दृढोऽयं बन्धः । स्नायुनिर्मितान् पाशानेतान् कथं वा व्रतदिवसे स्पृशामि?’’ इत्युक्त्वा सः समीपमेव वृक्षस्य पृष्ठतः निभृतं स्थितः ।

प्रदोषकाले मृगमन्विष्यन् काकस्तत्रोपस्थितः । मृगं तथाविधं दृष्ट्वा स उवाच, ‘‘सखे! किमेतत्?’’ मृगेणोक्तम्, ‘‘सुहृद्वाक्यस्य अनादरात् बद्धोऽहम् । उक्तं च –

सुहृदां हितकामानां यः शृणोति न भाषितम् ।
विपत् सन्निहिता तस्य स नरः शत्रुनन्दनः ॥’’

काकः **अब्रूत**, ‘‘स वञ्चकः क्वास्ते?’’ मृगेणोक्तम्, ‘‘मन्मांसार्थी तिष्ठत्यत्रैव।’’ काकः उक्तवान्, ‘‘उपायस्तावत् चिन्तनीयः।’’

अथ प्रभाते क्षेत्रपतिर्लगुडहस्तः आगच्छन् काकेनावलोकितः । तमालोक्य काकेनोक्तम्, ‘‘सखे मृग, त्वमात्मानं मृतवत्संदर्शय । वातेनोदरं पूरयित्वा पादान्स्तब्धीकृत्य तिष्ठ । यदाहं शब्दं करोमि तदा त्वमुत्थाय सत्वरं पलायिष्यसे ।’’ मृगस्तथैव स्थितः ।

क्षेत्रपतिना मृगः आलोकितः उक्तश्च, ‘‘आः! स्वयं मृतोऽसि!’’ सः मृगं बन्धनात् व्यमुञ्चत् । ततः काकशब्दं श्रुत्वा मृगः सत्वरं पलायितः । तमुद्दिश्य क्षेत्रपतिना क्षिप्तेन लगुडेन शृगालस्तावद् हतः ।

## भाषाभ्यासः



### १. पूर्णवाक्येन उत्तरं लिखत।

अ) अरण्ये कौ निवसतः स्म ?
आ) काकः किम् उपादिशत् ?
इ) मृगः प्रत्यहं क्षेत्रं गत्वा किम् अकरोत् ?
ई) क्षुद्रबुद्धिः कुत्र निभृतं स्थितः ?
उ) शृगालः केन हतः ?

### २. कः कं वदति ?

अ) ‘वनेऽस्मिन् एकं सस्यपूर्णं क्षेत्रमस्ति ।’
आ) ‘मित्र, छिन्धि तावन्मम बन्धनम् ।’
इ) ‘स वञ्चकः क्वास्ते ?’

### ३. उत्तरपदं लिखत ।

अ) काकोऽवदत् = काकः + ______ ।
आ) मृगेणोक्तम् = मृगेण + ______ ।
इ) जम्बूकोऽयम् = जम्बूकः + ______ ।

### ४. पूर्वपदं लिखत ।

अ) मृगोऽब्रवीत् = ______ + अब्रवीत् ।
आ) वातेनोदरम् = ______ + उदरम् ।
इ) मृतोऽसि = ______ + असि ।

### ५. माध्यमभाषया उत्तरत ।

अ) ‘स नरः शत्रुनन्दनः’ इति वचनं कथायाः आधारेण स्पष्टीकुरुत ।

आ) काकेन कः उपायः उक्तः ?

### ६. विरुद्धार्थकशब्दं लिखत ।

दृढः, मैत्री, बद्धः, प्रभूतम् ।

**७. अमरकोषात् योग्यं समानार्थकं शब्दं योजयित्वा वाक्यं पुनर्लिखत ।**

अ) अरण्ये मृगः काकः च स्नेहेन निवसतः ।

आ) जम्बूकः तेन सह मृगस्य निवासस्थानं गतः ।

इ) मृगमन्विष्यन् काकः तत्र उपस्थितः ।

**८. स्तम्भमेलनं कुरुत ।**

| विशेषणम् | विशेष्यम् |
|---|---|
| दृढः | लगुडेन |
| क्षिप्तेन | दिने |
| एकस्मिन् | मृगः |
| लगुडहस्तः | बन्धः |
| | क्षेत्रपतिः |

**९. तालिकां पूरयत ।**

अ)

| वक्त्रा संवादं मेलयत | |
|---|---|
| जम्बूकः | मृगः |
| | |
| | |


(मञ्जूषा - त्रायस्व माम्, दर्शयामि त्वाम्, दृढोऽयं बन्धः, छिन्धि मम बन्धनम्)

आ)

| वक्त्रा संवादं मेलयत | |
|---|---|
| मृगः | काकः |
| | |
| | |

(मञ्जूषा - अलं विवादेन, कोऽयं द्वितीयः?, एवमस्तु, अस्मत्सख्यम् इच्छति ।)

**१०. जालरेखाचित्रं पूरयत ।**




**उपक्रमः** – पाठात् उपपदविभक्तियुक्तानि वाक्यानि चित्वा लिखत ।

**क्रीडत-नन्दत ।**

**सङ्ख्याक्रीडा**

एकं द्वे त्रीणि . . . इति क्रमेण सर्वे मिलित्वा शतपर्यन्तं सङ्ख्याः वदेयुः। ततः पुनः तदेव आवर्तनीयम्। परन्तु अस्मिन् अवसरे सर्वाः विषमसङ्ख्याः शिक्षकः एव वदेत् । छात्रैस्तु केवलं समसङ्ख्याः वक्तव्याः। अग्रिमे आवर्तने शिक्षकः समसङ्ख्याः वदेत्, बालाश्च विषमसङ्ख्याः वदेयुः । एतेन सङ्ख्याभ्यासः सुष्ठु भवति।

**सङ्ख्यालेखनम्**

छात्राणां गणद्वयं करणीयम् । शिक्षकस्य समीपे कृष्णफलकं भवेत् । शिक्षकः यदा सूचयति तदा प्रतिगणम् एकः क्रीडकः अग्रे आगत्य कृष्णफलकस्य पुरतः तिष्ठति। शिक्षकः संस्कृतेन काञ्चित् सङ्ख्यां वदति । तौ शीघ्रातिशीघ्रं तां सङ्ख्यां कृष्णफलके लिखेताम् । यः आदौ लिखति तस्मै गणाय एकः अङ्कः दीयते । (सङ्ख्यां देवनागरीलिप्या रोमन्-लिप्या वा लेखितुम् अर्हन्ति ।)

– क्रीडावल्ली-पुस्तकात् ।

7KRBLA